नं० ४६६३ — च

स्वरूपतो गोदान प्रयोगः

पत्राणि ३ (त्रीणि)

© Dharmartha Trust J&K. Digitized by eGangotri

नं० ४६६३-घ

स्वत्रपतोगोदानप्रयोगः

नं० ४६६३-घ

पत्राणि ३ (त्रीणि)

© Dharmartha Trust J&K. Digitized by eGangotri

॥श्रीगणेशाय नमः॥ अथ मदनरत्नमयूखप्रभृतीन् ग्रंथानवलोक्य स्वरूपतो गोदानप्रयोगो लिख्यते। तत्र स
कलोपकरणानि संपाद्य पीठे प्राङ्मुखः स्वयमुपविश्य स्वपुरतः प्राङ्मुखीं सवत्सां गामवस्थाप्य स्वसंनिधौ उदङ्मु
खं ब्राह्मणमासनेऽपवेश्य कुशपवित्रपाणिराचम्य प्राणानायाम्य नक्षत्रा अद्येत्यादि एवंगुणविशेषणवि
शिष्टायां पुण्यतिथौ मम सर्वपापक्षयद्वारा श्रीपरमेश्वरप्रीत्यर्थं गोदानं करिष्ये। तदंगभूतं ब्राह्मणस्य वरणं
गोः पूजनं च करिष्ये। गोदान प्रतिग्रहकर्तृ ब्राह्मणवरणे नमः। एष तेऽर्घः। पादयोः पूजनं गंधपुष्पैः। एष
ते गंधः। एतत्ते पुष्पाणि। पादार्घ इदमाचमनीयं। अमुकगोत्र अमुकप्रवर गोदानप्रतिग्रहकर्तृत्वेन अमु
कगोत्रोऽमुकशर्माऽहं एभिर्द्रव्यैः त्वां वृणे। वृतोस्मीति प्रतिवचनं। ततो ब्राह्मणपूजनं गंधकुंकुमाक्षतपु
गद५ ष्पमाल्यैः। इदं अथ स्वस्त्वा पुराणसमुच्चयोक्तं गोः पूजनं पुष्पाद्यैस्तैरेवादेशभेदे दाक्षिण्य रमेतामापव
गं सर्वचक्षोर्ध्यानं तत्र शृंगयोर्मूले ब्रह्मणे नमः। विष्णवे नमः। नमः सर्वत्र। शृंगयोरग्रे सर्वतीर्थेभ्यो नमः।
शिरोमध्ये महादेवाय॥ ललाटे देव्यै। नासावंशे षण्मुखाय। नासापुटे कंबलाश्वतराभ्यां। कर्णयो
रश्विभ्यां। चक्षुषोः शशिभास्कराभ्यां। दंतेषु वसुभ्यः। जिह्वायां वरुणाय। हुंकारे सरस्वत्यै। गंडयोः सि
ताऽसितपक्षाभ्यां। ओष्ठयोः संध्याभ्यां। ग्रीवायां इंद्राय। ककुद्देशे रक्षोभ्यः। उरसि साध्येभ्यः। पादेषु ध

© Dharmartha Trust J&K. Digitized by eGangotri

मयि। आदौ पाश्चात्योः पादयोः सर्वत्र। जंघायां स्थापयाय। खुरमध्ये गंधर्वेभ्यः। खुराग्रे पन्नगेभ्यः। खुर
पश्चिमाग्रे अप्सरोगणेभ्यः। पृष्ठे एकादश रुद्रेभ्यः। सर्वसंधिषु वसुभ्यः। श्रोण्योः पितृभ्यः। पुच्छे सोमा भ्यः
य। चमरे आदित्यरश्मिभ्यः। गोमूत्रे गंगायै। गोमये यमुनायै। स्तनेषु सरस्वत्यै। नात्र स्मृतिस्तन
पूजावन्तिः स्तनानामवयवत्वात्। क्षीरे सरस्वती देवी इत्येवमलं वा पूर्व उक्तत्वाच्च। तत्रैव दक्षिणे नर्मदा
यै। पुनस्तत्रैव घृते हुताशनाय। रोमसु अष्टाविंशति कोटिदेवेभ्यः। उदरे पृथिव्यै। पयोधरस्थाने चतुर्भ्यः
सागरेभ्यः। इत्यावरणपूजा। ततो गन्धादिदेवतासहितायै सवत्सायै गवेन मण्डले वं सर्वोपचारैः पु
वाक्यमुक्तौ क्तौ यक कल्पित गंधा धूप चारैः सवत्सां संपूज्य सुवर्णशृंगादिभिरुपहारैरभिमतं कुर्यात्।
ततः प्रदक्षिणां कृत्वा प्रार्थनां कुर्यात्। या लक्ष्मीः सर्वभूतानां या च देवेष्ववस्थिता। धेनुरूपेण सा दे
वी मम पापं व्यपोहतु। देहस्था या च रुद्राणी शंकरस्य प्रिया सदा। धेनुरू० विष्णोर्वक्षसि या लक्ष्मीः
स्वाहा या च विभावसोः। चन्द्रार्कशक्रशक्तिर्या सा धेनुः पातु मां सदा। चतुर्मुखस्य या लक्ष्मीर्या ल
क्ष्मीर्धनदस्य च। लक्ष्मीर्या लोकपालानां सा धेनुर्वरदास्तु मे। स्वधा त्वं पितृमुख्यानां स्वाहा य शिव०
ज्ञभुजां तथा। सर्वपापहरा धेनुस्तस्माच्छान्तिं प्रयच्छ मे। घृतक्षीरप्रदा गावो घृतयोन्यो घृतोद्भवाः। ॥१॥

© Dharmartha Trust J&K. Digitized by eGangotri

घृतं न घो घृतावर्त्तास्ता मे सन्तु सदा गृहे॥ घृतं मे हृदये नित्यं घृतं नाभ्यां प्रतिष्ठितं। घृतं मे सर्वतश्चैव गवां मध्ये
वसाम्यहं। गावो ममाग्रतः सन्तु गावो मे सन्तु पृष्ठतः। गावो मे हृदये सन्तु गवां मध्ये वसाम्यहं। पंच गावः समु
त्पन्ना मथ्यमाने महोदधौ। तासां मध्ये तु या नंदा तस्यै धेन्वै नमो नमः। ततो गोपुच्छोदकतर्पणं कृत्वा कृतां॥
तथैवं। प्राङ्मुखः। देवासुरास्तथा नागा यक्षगंधर्वराक्षसाः। पिशाचा गुह्यकाः सिद्धाः कूष्मांडास्तरवः ख
गाः। जलेचरा भूमिचरास्तथैवाकाशगामिनः। निराधाराश्च ये जीवाः पापेऽधर्मरताश्च ये। तेषां तृप्तिमखि
ला यांतु गोपुच्छाग्रेण तर्पणैः। इत्येकोंजलिः। ततः अपसव्यं दक्षिणामुखः। मातृपक्षाश्च ये केचिद् ये चान्ये पि
तृपक्षजाः। गुरुश्वशुरबंधूनां ये कुलेषु समुद्भवाः। ते सर्वे तृप्तिमायांतु गोपुच्छोदकतर्पणैः। इति द्वितीयः। सव्यं
कृप उपस्पृश्य। केचिन्नित्यतर्पणं कृत्वा श्लोकतर्पणमाचरंति। तन्नेत्यन्ये। स्नानांगतर्पणेनैव नित्यतर्पणसिद्धेः। नैव ७सि
श्राद्धद्वयं कुर्यात्समाने हनि कुत्रचित्। इत्यत्र श्राद्धपदं नित्यकर्मणामुपलक्षणमिति निषेधात्। न च नित्यकर्मणां
निर्वर्त्तिं विना काम्यं कर्त्तुमुचितं। अतोऽकृतं चेत्कर्त्तव्यमित्यपरे। श्लोकतर्पणं तु बहूनां न संमतं। तर्पणेऽधि
कृतानां सूरीणां तु तर्पणमेव नाचरंति शिष्टाः। ततः प्राङ्मुखः सन् सुवर्णभाजपात्रे हस्ते गृहीत्वा तत्र पुच्छं घृ गो २
ताक्तं कृत्वा प्रागग्रे विप्रहस्ते कुशतिलजलान्यादाय स्वहस्तेपि कुशतिलजलान्यादाय पूर्ववद्देशकाला

© Dharmartha Trust J&K. Digitized by eGangotri

दि संकीर्त्य श्रीपरमेश्वरप्रीत्यर्थं इमां गां सवत्सां सुवर्णशृंगां घण्टालंकृतां सवस्त्रां सोपस्करां गंधपुष्पाद्यर्चितां प्र-
जापतिदैवतां अमुकगोत्राय अमुकशर्मणे ब्राह्मणाय तुभ्यं अमुकगोत्रः अमुकशर्माहं संप्रददे। श्रीवासुदे-
वः प्रीयतां। न मम। दानवाक्यं पठेत्। यज्ञस्साधनभूता या विश्वस्याघप्रणाशिनी। विश्वरूपधरो देवः प्रीय-
तामनया गवा। गोदानप्रतिष्ठासिद्ध्यर्थं यथाशक्ति अग्निदैवतं सुवर्णदक्षिणां तुभ्यमहं संप्रददे। न मम। वि-
प्रस्तु पुच्छं धृत्वा स्वादस्त्वानुष्टुपि वीत्वा प्रतिगृह्णाति इति यजुःशाखीयमंत्रेण स्वस्वशाखीयमंत्रेण वा प्रतिग्रहं
दक्षिणां च प्रतिगृह्णीयात्। गोदानप्रतिष्ठासिद्ध्यर्थं न्यूनातिरिक्तदोषपरिहारार्थं च भूयसीं दक्षिणां नाना-
गोत्रेभ्यो ब्राह्मणेभ्यो ऽहं संप्रददे। महाविष्णुः प्रीयतां न मम। ततो ब्राह्मणं धेनुमनुव्रजन् गोमतीविद्यां पठेत्।
सा यथा। गावः सुरभयो नित्यं गावो गुग्गुलगंधिकाः। गावः प्रतिष्ठा भूतानां गावः स्वस्त्ययनं महत्। अन्नमे-
व परं गावो देवानां हविरुत्तमं। पावनं सर्वभूतानां रक्षंति च वहंति च। हविषा मंत्रपूतेन तर्पयंत्यमरान् दिवि।
ऋषीणामपि होतॄणां गावो होमे प्रतिष्ठिताः। सर्वेषामेव भूतानां गावः शरणमुत्तमं। गावः पवित्रं परमं गा-
वो मंगलमुत्तमं। गावः सर्वस्य लोकस्य गावो धन्याः सनातनः। नमो गोभ्यः श्रीमतीभ्यः सौरभेयीभ्य एव च।
नमो ब्रह्मसुताभ्यश्च पवित्राभ्यो नमो नमः। ब्राह्मणाश्चैव गावश्च कुलमेकं द्विधा कृतं। एकत्र मंत्रास्तिष्ठंति
हविरेकत्र तिष्ठति। गावो मामुपतिष्ठंतु हेमशृंग्यः पयोमुचः। सुरभ्यः सौरभेय्यश्च सरितः सागरं यथा। शिव·

© Dharmartha Trust J&K. Digitized by eGangotri

गावै पश्याम्यहं नित्यं गावः पश्यंतु मां सदा। गावोस्माकं वयं तासां यतो गावस्ततो वयम्॥ यस्य स्मृत्येति वि
ष्णुस्मरणं॥ ॥इति स्वरूपतो गोदान प्रयोगः॥ संवत १९१९ वर्षे पौषशुक्ल ४ रवौ लिखितं पाण्डि कृदेवक
ण्ठस्तनुना करुणाकरेण शुभमस्तु॥ ॥ ॥अथैतत्प्रयोगानुसारेणोपकरणानि॥ ॥

पीठ २	तिलाः	धूप	आच्छादनीयं वस्त्रं
सवत्सा गौः	अक्षताः	दीप	वत्सस्याच्छादनीयं
प्रतिगृहीता	तंदुलाः	नैवेद्य	ललाटाभरणं
कुशाः	चंदनं	विप्रवरणोपकरणानि	कंठाभरणं
सजलं पात्रं	पुष्पाणि	सुवर्णशृंग २	ससुवर्णसाज्यपात्रं
आचमनीयपात्रं	पुष्पमाला ३	रौप्यखुराः ४	दक्षिणाद्रव्यं सुवर्णं
अर्घ्यपात्रं	तुलसी	ताम्रपृष्ठी १	भूयसीदक्षिणाद्रव्यं चेति।
	कुंकुम	कांस्यदोहिनी	

शिवं
॥३॥

© Dharmartha Trust J&K. Digitized by eGangotri

3

2

© Dharmartha Trust J&K. Digitized by eGangotri